त्रिदोषदाहानलदोषहारि
कफामयभ्रान्तिविरोधकारि ॥"
इति राजनिर्घण्टः ॥

समुद्रफेनः, पुं, (समुद्रस्य फेनः ।) स्वनामख्यातद्रव्यम् । तत्पर्य्यायः । फेनः २ अब्धिकफः ३ अर्णवजमलः ४ । इति रत्नमाला ॥ डिण्डीरः ५ । इत्यमरः ।२।९।१०५॥ समुद्रकफः ६ जलहासः ७ फेनकः ८ । इति त्रिकाण्डशेषः ॥ समुद्रफेनम् ९ फेनम् १० वार्द्धिफेनम् ११ पयोधिजम् १२ सुफेनम् १३ अब्धिडिण्डीरम् १४ सामुद्रम् १५ । अस्य गुणाः । शिशिरत्वम् । कषायत्वम् । नेत्ररोगकफकण्ठामयारुचिकर्णरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः ।
कषायो विषपित्तघ्नः कर्णरुक्कफहृल्लघुः ॥"
इति भावप्रकाशः ॥

समुद्रमेखला, स्त्री, (समुद्रः मेखलेव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रयात्रा, स्त्री (समुद्रे यात्रा गमनम् ।) समुद्रगमनम् । (यथा, हरिवंशे । १४५ । ४ ।
"द्वारवत्यां निवसतो विष्णोरतुलतेजसः ।
समुद्रयात्रा सम्प्राप्ता तीर्थे पिण्डारके नृप ॥")
कलियुगे तन्निषेधो यथा --
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।"
इत्युपक्रमे ।
"इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥"
इत्युद्वाहतत्त्वे उक्तवान् ॥

समुद्रयानं, क्ली, (समुद्रस्य यानम् ।) पोतम् । जाहाज इति भाषा । यथा—
"पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ।
समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
एवं निश्चित्य मनसा महासार्थपुरःसरः ।
समुद्रयायिभिर्लोकैः संविदं सूच्य निर्गतः ॥"
इत्युपक्रमे ।
"गुरुेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढ़ास्ततः सर्व्वे पोतवाहैरुपोषिताः ॥"
इति वाराहे गोकर्णमाहात्म्यनामाध्यायः ॥
( समुद्रगमनम् । यथा, मनुः । ८ । १५७ ।
"समुद्रयानकुशला देशकालार्थदर्शिनः ।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति ॥"

समुद्रयायी, [न्] त्रि, (समुद्रं गच्छतीति ।गम + णिनिः । ) समुद्रगामी । यथा, वाराहे ।
"समुद्रयायिभिर्लोकैः संविदं सूच्य निर्गतः ॥"
(अस्य निन्दा यथा, मनौ । ३ ।१५८ ।
"आगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥
* * *
एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥")

समुद्ररमणा, स्त्री, (समुद्रो रमण इव यस्याः ।) पृथ्वी । इति हलायुधः ॥ ( क्वचित् समुद्ररसना इति पाठो दृश्यते ॥ )

समुद्रलवणं, क्ली. (समुद्रजातं लवणम् ।) समुद्रजलजातलवणम् । करकच् लवण इति भाषा । तत्पर्य्यायः । सामुद्रकम् २ सामुद्रम् ३ शिवम् ४ वशिरम् ५ सारोत्थम् ६ अक्षीवम् ७ लवणाब्धिजम् ८ । अस्य गुणाः । लघुत्वम् । हृद्यत्वम् । पलितास्रपित्तदत्वम् । विदाहित्वम् । कफवातघ्नत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च, भावप्रकाशे ।
"सामुद्रं यत्तु लवणमक्षीवं वशिरञ्च तत् ।
सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु ॥
नात्युष्णं दीपनं भेदि अक्षारमविदाहि च ।
श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम् ॥"

समुद्रवह्निः, पुं, (समुद्रस्य वह्निः ।) बाड़वानलः । इति हलायुधः ॥

समुद्रविजयः, पुं, हत्तार्हत्पिता । इति हेमचन्द्रः ॥

समुद्रसुभगा, स्त्री, (समुद्रस्य सुभगा ।) गङ्गा । इति राजनिर्घण्टः ॥

समुद्रा, स्त्री, सटी । ( सम्यगुद्गतो रोऽग्निर्यस्याः ।) शमी । इति राजनिर्घण्टः ॥

समुद्रान्तं, क्ली, (समुद्रस्य अन्त उत्पत्तिस्थानत्वेनास्त्यस्येति । अच् । ) जातीफलम् । इति शब्दचन्द्रिका ॥ ( समुद्रस्य अन्तम् । ) समुद्रतीरम् ॥ (समुद्रः अन्तो यस्येति । समुद्रान्तविशिष्टे, त्रि । यथा, भागवते ।१०।४७।३३।
"एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥")

समुद्रान्ता, स्त्री, (समुद्रस्य, अन्तः उत्पत्तिस्थानत्वेनास्त्यस्या इति । अच् । टाप् ।) दुरालभा । इत्यमरः ।२।४।९२॥ कार्पासी । पृक्का । इति मेदिनी ॥ यवासः । इति राजनिर्घण्टः ॥

समुद्राम्बरा, स्त्री, (समुद्रः अम्बरमिव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रारुः, पुं, (समुद्रं ऋच्छतीति । ऋ + उण् ।) कुम्भीरः । सेतुबन्धः । तिमिङ्गिलमत्स्यः । इति मेदिनी ॥

समुद्रियः, त्रि, ( समुद्रे भव इति । समुद्र + "समुद्राभ्राद्घः ।" ४ । ४ । ११८ । इति घः ।) समुद्रभवः । समुद्रसम्बन्धी । ( यथा, वाजसनेयसंहितायाम् । ११ । ४६ ।
"हृयाग्निं हृपणं भरन्नपां गर्भं समुद्रियम् ॥")

समुद्रीयः, त्रि, समुद्रसम्बन्धी । समुद्रशब्दात् छीयप्रत्ययेन निष्पन्नः ॥

समुन्दनं, क्ली, (सम् + उन्द + ल्युट् ।) आर्द्रीभावः । तत्पर्य्यायः । तेमः २ स्तेमः ३ । इत्यमरः ।३।२।२९॥

समुन्नं, त्रि, (सम + उन्द + क्तः ।) आर्द्रम् । इत्यमरः । ३ । १ । १०५ ॥

समुन्नतः, त्रि, (सम् + उत् + नम + क्तः ।) समुन्नद्धः । स्तम्भभेदः । इति धरणिः ॥

समुन्नतिः, स्त्री, ( सम् + उत् + नम + क्तिन् । ) उच्छ्रायः । उत्सेधः । इति जटाधरः ॥ ( यथा, कुमारे । ६ । ६६ ।
"उपपन्नमिदं सर्व्वमतः परमपि त्वयि ।
मनसः शिखराणाञ्च सदृशी ते समुन्नतिः ॥")

समुन्नद्धः, त्रि, (सम् + उत् + नह + क्तः ।) पण्डितम्मन्यः । गर्व्वितः । इत्यमरः ।३।३।१०३॥ प्रभुः । इत्यजयः ॥ समुद्धृतः । इति मेदिनी ॥ ऊर्द्ध्वबद्धः । इति हेमचन्द्रः ॥

समुपजोषं, [म्] अव्य, (सम् + उप + जुष + अम् ।) आनन्दः । इत्यमरटीकायां रामाश्रमः । ३ । ४ । १० ॥ तालव्यशकारादि च ॥

समुपेयिवान्, [ स ] त्रि, गमनकर्त्ता । गमनविशिष्टः । समुपपूर्व्वधातोः क्वसुप्रत्ययेन निष्पन्नः ॥

समुल्लसत्, त्रि, सम्यगुल्लासयुक्तम् । समुत्पूर्व्वलसधातोः शतृप्रत्ययेन निष्पन्नम् ॥

समुल्लिखन्, [त्] त्रि, (सम् + उत् + लिख + शतृ ।) पादादिना भूमिखननकर्त्ता । यथा,—
तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान् ।
दृष्टः कथञ्चिद्गवयैर्व्विविग्नै-
रसोढ़सिंहध्वनिरुन्ननाद ॥"
इति कुमारसम्भवे । १ । ५६ ॥

समूढ़ः, त्रि, ( सम् + वह + क्तः । ) पुञ्जितः । ( यथा, माघे । १ । ४ ।
"नवानधोऽधो वृहतः पयोधरान्
समूढ़कर्पूरपरागपाण्डुरम् ॥")
भुग्नः । सद्योजातः । अनुपप्लुतः । । इति मेदिनी ॥ दमितः । विवाहितः । इति धरणिः ॥ शोधितः । इति जटाधरः ॥ मूढ़ेन सहितश्च ॥

समूरः, पुं, मृगभेदः । इति हेमचन्द्रः ॥

समूरुः, पुं, मृगविशेषः । इत्यमरः । २ । ५ ।९॥

समूलं, त्रि, मूलेन सह वर्त्तमानम् । मूलसहितम् । यथा,—
"अधर्म्मेणैधते राजंस्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥"
इति महाभारते शान्तिपर्व्वणि राजधर्म्मे युधिष्ठिरं प्रति भीष्मवाक्यम् ॥

समूहः, पुं, (समूह्यते इति । सम् + ऊह + घञ् ।) अनेकः । तत्पर्य्यायः । निवहः २ व्यूहः ३ सन्दोहः ४ विसरः ५ व्रजः ६ स्तोमः ७ ओघः ८ निकरः ९ व्रातः १० वारः ११ संघातः १२ सञ्चयः १३ समुदायः १४ समुदयः १५ समवायः १६ चयः १७ गणः १८ संहतिः १९ वृन्दम् २० निकुरम्बम् २१ कदम्बकम् २२ । इत्यमरः ॥ २।५।३९-४० ॥ पूगः २३ सङ्घयः २४ स्कन्धः २५ निचयः २६ जालम् २७ अग्रम् २८ पटलम् २९ काण्डम् ३० मण्डलम् ३१ चक्रम् ३२ । इति जटाधरः ॥ विस्तरः ३३ उत्कारः ३४ समुच्चयः ३५ आकरः ३६ प्रकरः ३७ संघः ३८ प्रचयः ३९ जातम् ४० । इति